# Shakyasimha Stotram

# શાક્યસિંહસ્તોત્રમ્ ૩

## Document Information

Text title : Shakyasimha Stotram

File name : shAkyasiMhastotram3.itx

Category : misc, buddha, stotra

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

Shakyasimha Stotram

# શાક્યસિંહસ્તોત્રમ્ ૩

ૐ નમઃ શાક્યસિંહાય ।
નમસ્તે શાક્યસિંહાય ધર્મચક્રપ્રવર્તક ।
ત્રૈધાતુકં જગત્સર્વં શોધયેત્ સર્વદુર્ગતિમ્ ॥ ૧॥

નમસ્તે વજ્રોષ્ણીષાય ધર્મધાતુસ્વભાવક ।
સર્વસત્ત્વહિતાર્થાય આત્મતત્ત્વપ્રદેશક ॥ ૨॥

નમસ્તે રત્નોષ્ણીષાય સમન્તાત્તત્ત્વભાવનૈઃ ।
ત્રૈધાતુકં સ્થિતં સર્વમભિષેકપ્રદાયક ॥ ૩॥

નમસ્તે પદ્મોષ્ણીષાય સ્વભાવપ્રત્યભાષક ।
આશ્વાસયન્યઃ સત્ત્વેષુ ધર્મામૃતં પ્રવર્તયેત્ ॥ ૪॥

નમસ્તે વિશ્વોષ્ણીષાય સ્વભાવકૃતમનુસ્થિત ।
વિશ્વકર્મકરો હ્યેષ સત્ત્વાનાં દુઃખશાન્તયે ॥ ૫॥

નમસ્તે તેજોષ્ણીષાય ત્રૈધાતુકમભાષક ।
સર્વસત્ત્વ ઉપાયેષુ સત્ત્વદૃષ્ટં કરિષ્યતે ॥ ૬॥

નમસ્તે ધ્વજોષ્ણીષાય ચિન્તામણિધ્વજાધર ।
દાનેન સર્વસત્ત્વાનાં સર્વાશાપરિપૂરક ॥ ૭॥

નમસ્તે તૃષ્ણોષ્ણીષાય ક્લેશોપક્લેશછેદન ।
ચતુર્મારબલં ભગ્નં સત્ત્વાનાં બોધિપ્રાપ્તયે ॥ ૮॥

નમસ્તે છત્રોષ્ણીષાય આતપત્રં સુશોભનમ્ ।
ત્રૈધાતુક જગત્સર્વં ધર્મરાજત્વપ્રાપકમ્ ॥ ૯॥

લાસ્યા માલા તથા ગીતા નૃત્યા દેવીચતુષ્ટયમ્ ।
પુષ્પા ધૂપા ચ દીપા ચ ગન્ધાદેવી નમોઽસ્તુ તે ॥ ૧૦॥

દ્વારમધ્યસ્થિતા યે ચ અઙ્કુશપાશસ્ફોટકાઃ ।

શ્રદ્ધાભાવવિનિર્ગાતં દ્વારપાલ નમોઽસ્તુ તે ॥ ૧૧॥

વેદિકાદૌ સ્થિતા યે ચ ચતસ્રો દ્વારપાલિકાઃ ।
મુદિતાદૌ દશ સ્થિત્વા બોધિસત્ત્વ નમોઽસ્તુ તે ॥ ૧૨॥

બ્રહ્મેન્દ્રરુદ્રચન્દ્રાર્કા લોકપાલાશ્ચતુર્દિશમ્ ।
અગ્ની રાક્ષસવાયુશ્ચ ભૂતાધિપતે નમોઽસ્તુ તે ॥ ૧૩॥

અનેન સ્તોત્રરાજેન સંસ્થિતો મણ્ડલાગ્રતઃ ।
વજ્રઘણ્ટાધરો મન્ત્રી ઇદં સ્તોત્રમુદાહરેત્ ॥ ૧૪॥

ઇતિ દુર્ગતિપરિશોધનોદ્ધૃતં શ્રીશાક્યસિંહસ્તોત્રં સમ્પૂર્ણમ્ ॥

---

*Shakyasimha Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*